No. ११२८-घ

Title यज्ञोपवीतधारणमन्त्रविधिः

Author

Extent २ Age

Subject धर्मशास्त्रम्

नवीनयज्ञोपवीतधारणस्य मंत्रविधिः

११२८

२ पत्रे

ॐ श्रीगणेशाय नमः ॥ देशकालौ स्मृत्वा श्रीपरमेश्वरप्रीत्यर्थं श्रौतस्मा
र्तनित्यकर्मानुष्ठानसिद्ध्यर्थं यज्ञोपवीतेनाभिमंत्रणं करिष्ये धारणंच समु॰
द्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यंत्यनिविशमानाः इंद्रो या वज्री वृषभो
रराद ता आपो देवीरिह मामवंतु यासां राजा वरुणो याति मध्ये सत्यानृ
ते अवपश्यंजनानां मधुश्चुतः शुचयो याः पावकाः ता आपो देवीरिह
मामवंतु त्रिसृभिः एतोन्विंद्रं स्तवाम शुद्धं शुद्धेन साम्ना शुद्धैरुक्थैर्वावृ
ध्वांसं शुद्ध आशीर्वान्ममत्तु त्रिसृभिः तरत्समंदी धावति धारा सुतस्यां
धसः तरत्समंदी धावति उस्रा वेद वसूनां मर्तस्य देव्यवसः तरत्समंदी धा राम १
वति ध्वस्रयोः पुरुषंत्योरा सहस्राणि दद्महे तरत्समंदी धावति शुची

हि

वोरस्याम सत्नः शचीनोत्शचीनो मघोन्य्रंशुविभ्यः अनेन समममितृतस्याय।
स्यायेश्युविजन्मानः श्युचयः पावकाः इत्यावाह्य गायत्रीजपान्ते मंत्रत्रयम्
ओंकारः प्रथमतंतौ न्यसामि अग्निं द्वितीयतंतौ न्यसामि नागं तृतीयतं
तौ न्यसामि सोमं चतुर्थतंतौ न्यसामि पितॄन्पंचमतंतौ न्यसामि प्रजा
म पतिं षष्ठतंतौ न्यसामि वायुं सप्तमतंतौ न्यसामि सूर्यमष्टमतंतौ न्यसा।
मि विश्वान्देवान्नवमतंतौ न्यसामि उद्वयंतमसस्परिस्त्रक ब्रह्म
जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य
विष्ठाः सतश्च योनिमसतश्च विवः त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं
उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् यज्ञोपवीतं परमं पवित्रं

प्रजापतेर्यत्सहजंपुरस्तात् आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलम

वा॰कु॰ स्तुतेजः दक्षिणांसुधार्याचम्य जीर्णयज्ञोपवीतविसर्जनमंत्रः ॥ ॥

2

ॐ यज्ञोपवीतंयदिजीर्णवंतंवेदांतवेद्यंपरिमस्यमस्तु आयुष्यमग्र्यंप्रति।

मुंचशुभ्रंजीर्णोपवीतंविसर्जनमस्तुतेजः ॥ शुभमस्त्वन्तु ॥ सर्वम् ॥ ॥